# Munayah Krita Shivavandana

# મુનયઃ કૃતા શિવવન્દના

## Document Information

Text title : Munayah Krita Shivavandana

File name : munayaHkRRitAshivavandanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 24 | 42-50 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 31, 2024

*sanskritdocuments.org*

# મુનયઃ કૃતા શિવવન્દના

શિવ શ્રીમહાદેવ ગૌરીપતે માં ત્વદીયં નયાપારસંસારપારમ્ ।
ભવન્તં વિના કોઽપિ નાસ્ત્યેવ લોકે ન માતા પિતા વા ન દાતા મહેશ ॥ ૪૨॥

અઘોરા હિ સંસારવૃત્તિસ્ત્વપારા હરાચારહીનસ્ય હારાનુકારઃ ।
કદાપ્યસ્ય નેત્યેવ સંસારપારં નયાશુ પ્રપશ્યેશ પશ્ય પ્રપશ્ય ॥ ૪૩॥

કદા વા મુદા વા મહાદેવ દેવેત્યુપાલમ્ભનેનાપિ કાલો વિનેયઃ ।
સ્વકાલોઽપિ નેયઃ સ કાલોઽયમાસીત્ ઇતિ શ્રીમહાકાલકાલાનુવેલમ્ ॥ ૪૪॥

અયં પુણ્યકાલો મહાકાલકાલઃ સ્મૃતો યેન કાલસ્વભાવોઽયમાસીત્ ।
અયં શોભનસ્યાપિ કાલો યતોઽભૂત્ મહેશસ્મૃતિર્મુક્તિદાનપ્રવીણા ॥ ૪૫॥

સ સંસારમોહપ્રવાહોઽપિ નષ્ટઃ ક્ષણાર્ધાદિહાર્ધેન્દુમૌલે કૃપાલો ।
અલં બાલલીલાભિરિત્યેવ કુર્મઃ શિવારાધનં બાલબિલ્વીદલાદ્યૈઃ ॥ ૪૬॥

સંસારચણ્ડકરધીરકરપ્રચારૈઃ તપ્તં શરીરમિદમેતદતઃ પરં મે ।
ગૌરીમનોહરતરુપ્રવરોપકણ્ઠચ્છાયામુપેત્ય નિવસામિ ખલુ પ્રકામમ્ ॥ ૪૭॥

દુર્વૃત્તવૃત્તશમનોપશમાય શર્વં શશ્વત્ સમીહિતસમર્પણકારણેષુ ।
લિઙ્ગેષુ ફુલ્લકમલૈઃ કમલૈશ્ચ બિલ્વૈરભ્યર્ચયામિ સિતભૂતિવિભૂષિતાઙ્ગઃ ॥ ૪૮॥

નાતઃ પરં કૃત્યમુમા સહાયપાદારવિન્દભજનાદપિ કિં વદાન્યત્ ।
કૃત્યં વિશિષ્ય સકલેપ્સિતદાનદક્ષદાક્ષાયણીરમણમક્ષરમાશ્રયામઃ ॥ ૪૯॥

ગૌરીમનોરમણ તે ચરણારવિન્દમસ્માકમસ્તુ શરણં તરુણેન્દુમૌલે ।
નક્ષત્રમણ્ડલ નિભામલગણ્ડમાલા લીલાવિલોકનવિલોચનભાલલોલ ॥ ૫૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મુનયઃ કૃતા શિવવન્દના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૪। ૪૨-૫૦ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 24. 42-50

..

Proofread by Ruma Dewan

*Munayah Krita Shivavandana*

pdf was typeset on January 31, 2024

Please send corrections to *sanskrit@cheerful.com*